# Shri Vivekananda Stotram

# श्रीविवेकानन्दस्तोत्रम्

## Document Information

Text title : Shri Vivekananda Stotram

File name : vivekAnandastotram4.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Dakshinaranjana Bhattacharya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीविवेकानन्दस्तोत्रम्

जीवसेवाव्रतं यस्य लक्ष्यमासीन्महीतले
ज्ञानमात्मगतं यो वै तेन मार्गेण सङ्गतः ।
कर्मिणे ज्ञानिने चैव भक्ताय स्वामिने पुनः
विवेकानन्दरूपाय भूयो भूयो नमाम्यहम् ॥ १॥

यत्सेवाव्रतमामनन्ति मुनयो बुद्धो जिनः शङ्करः
श्रीरामः कमनीयकाम्यकवने वृन्दावने माधवः ।
जाह्नव्याः सुतटेषु गौड़गहने गौराङ्गदेवस्तथा
तत्सेवाव्रतमद्य साधकवरः स्वामी पुनर्घोषते ॥ २॥

देवा नागाश्च यक्षाः खगभुजगगनाश्चाप्सरोरंशभूता
गन्धर्वा राक्षसा ये सकलभुवनजाश्चासुरा वृक्षजाताः ।
शत्रुर्मित्रं च ये वा निखिलनरकजा यातनास्थाश्च जीवा
आब्रह्म स्तम्बरूपं जगदिदमखिलं तृप्यतां तृप्यतां भोः ॥ ३॥

चण्डालो ब्राह्मणो वा गुरुरुत वयसा लाघवः पण्डितो वा
मूर्खो दीनो धनाढ्यः सकलगुणगणैरन्वितो निर्गुणो वा ।
सर्वे नारायणास्ते वयमपि च तथा यूयमप्यत्र भूता
आत्मा नारायणोऽयं प्रचरति बहुशः सेव्यतामात्मरूपः ॥ ४॥

द्वारे भिक्षुर्बुभुक्षुः कथयति करुणं "मुष्टिनेयं कदन्नं"
क्षुद्रो मार्जारको मे विलपति नितरां "देहि मे मत्स्यखण्डम्" ।
ते सर्वे भूतजाताः सममपि जगतां सेविताश्चेद्भवेयु-
र्नूनं सैवात्मसेवा भवति च सकला नान्यतः सेवनान्मे ॥ ५॥

एवं पुत्राश्च दाराः सकलपरिजना बान्धवाश्चार्थराशिः
सर्वं यद्वास्मदीयं भवति च भुवने तत्तु नारायणार्थम् ।
वाक्यं कायो मनो मे भवति भगवता चालितं हृद्गतेन
दीनोऽहं भगवन् तवैव नियतं दासोऽस्मि दासाधमः ॥ ६॥

दासोऽहं भवतो गृहाण कृपया मत्कर्मलब्धं फल-
मेवं कर्मफलं समर्प्य भगवन्नारायणोद्देशतः ।
मुक्तः कर्मफलाद्विशुद्धहृदयो योगे मनो दीयतां
मुक्तिं बन्धनतो लभस्व नियतां “कस्त्वं” पुनश्चिन्त्यताम् ॥ ७॥

नाहं कायो जघन्यः कफमलसहितः पञ्चभूतात्मको वा
नाहं छेद्यो न दाह्यो न च मरणवशो नापि जातः कदाचित् ।
नाहं कर्मी न भक्तो न च सुखमपि वा दुःखलेशो मदीयः
सोऽहं यः षष्ठचक्रे विलसति नियतं “सच्चिदानन्दरूपः” ॥ ८॥

इत्येतत्तत्त्वजातं नवतरभुवने प्राच्यपाश्चात्यभागे
योऽयं नव्यावतारो गुरुकुलतिलको घोषयामास नादैः ।
येनायं धर्मराज्ये सकलजनगुरुर्भारतोऽस्यां धरण्या
ह्येत्यतत् साधितं वै सुनिपुणवचसा पूजितः सर्वथाऽसौ ॥ ९॥

हे मुक्त ! लोकस्थित-सिद्धसाधो !
भक्ताधमोऽहं न च कर्मलिप्सुः ।
ज्ञानामृतं किं न हि तत् प्रजाने
निराश्रयोऽहं शरणं प्रयाचे ॥ १०॥

इति श्रीदक्षिणारञ्जनभट्टाचार्यविरचितं
“श्रीविवेकानन्दस्तोत्रम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Vivekananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*